# શ્રીબ્રહ્માકૃતં શ્રીગણેશસ્તોત્રમ્

Shri Ganesha Stotram by Brahma

sanskritdocuments.org

May 24, 2019

# Shri Ganesha Stotram by Brahma

# શ્રીબ્રહ્માકૃતં શ્રીગણેશસ્તોત્રમ્

## Sanskrit Document Information

Text title : Shri Ganesha Stotram by Brahma

File name : gaNeshastotrambrahmAkRRitam.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Latest update : May 23, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 24, 2019

*sanskritdocuments.org*

Shri Ganesha Stotram by Brahma

# શ્રીબ્રહ્માકૃતં શ્રીગણેશસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
બ્રહ્મોવાચ -
શમ્ભો તવાયં તનયસ્ત્વમેવાયં ન સંશયઃ ।
સર્વદેવાગ્રપૂજ્યોઽયં શેષે ત્વઞ્ચ મહેશ્વરઃ ॥ ૧॥

આદાવન્તે ભવાનેવ પૂજ્યો દેવો મહેશ્વરઃ ।
સર્વદેવગણસ્યાયમધિપોઽભૂન્મહાભુજઃ ॥ ૨॥

ભવતોઽપિ ગણા યે તુ તેષામપ્યધિપોઽભવત્ ।
તસ્માદ્ગણાધિપોઽસ્ત્વેષ ગજાસ્યત્વાદ્ગજાનનઃ ॥ ૩॥

ઇન્દ્રં જિત્વા ગજં હત્વા ભગ્નદન્તં શિરો યતઃ ।
નન્દી ચાદ્ભૂતકર્માસૌ દદૌ તેનૈકદન્તકઃ ॥ ૪॥

હેરમ્બ ઇતિ નામાસ્ય બીજરૂપં સદાસ્તુ હ ।
લમ્બોદરસ્તુન્દિલત્વાન્નામ્ના પુત્રોઽસ્તુ તે શિવ ॥ ૫॥

અસ્ય સ્મરણમાત્રેણ સર્વે વિઘ્ના ભયં યયુઃ ।
વિઘ્નેશોઽયમતો નામ્ના તવ પુત્રોઽસ્તુ શઙ્કર ॥ ૬॥

યાત્રાયાં સત્ક્રિયારમ્ભે યઃ સ્મરેચ્ચ ગણાધિપમ્ ।
તસ્ય યાત્રાફલં સિદ્ધ્યેદારબ્ધસ્યાન્તદર્શનમ્ ॥ ૭॥

સર્વમઙ્ગલકાર્યેષુ પૂજનીયો ગણાધિપઃ ।
ગણેશે પૂજિતે દેવાઃ પૂજિતાઃ કાર્યસાધકાઃ ॥ ૮॥

ઇતિ શ્રીબ્રહ્માકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Shri Ganesha Stotram by Brahma*

pdf was typeset on May 24, 2019

Please send corrections to *sanskrit@cheerful.com*